निषादी, [ न् ] पुं, ( निषीदत्यवश्यमिति । नि+सद्+आवश्यके णिनिः । ) हस्त्यारोहः । इत्यमरः । २ । ८ । ५९ ॥ माहुत इति ख्यातः ॥ ( यथा, माघे । ५ । ४१ ।
"प्रत्यग्रदन्तिनिशिताङ्कुशदूरभिन्न-
निर्याणनिर्यदसृजं चलितं निषादी ॥"
उपविष्टे, त्रि । यथा, रघुः । १ । ५२ ।
"आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु ॥")
निषिद्धं, त्रि, ( निषिध्यते स्मेति । नि+षिध+क्तः । ) निषेधविषयम् । यथा,—
"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम् ॥"
इति तिथितत्त्वम् ॥
निषिद्धकर्म्माणि यथा,—
मान्धातोवाच ।
"ब्रूहि कर्म्मान् मुनीशान्यान् मद्विधानां सुखावहान् ।
निषिद्धमपि यच्चैषां तदेव प्रथम वद ॥
नारद उवाच ।
व्याकरणं प्रशुनिवहणञ्च
छन्दिर्व्वणिज्या पशुपालनञ्च ।
शुश्रूषणञ्चापि तथार्थहेतो-
रकार्य्यमेतत् परमं ब्राह्मणस्य ॥
राजप्रेष्यं कृषिधनं जीवनञ्च वणिज्यया ।
कौटिल्यं कौलटीचञ्च कुसीदञ्च विवर्ज्जयेत् ॥
शूद्रो राजन् ! स भवति धर्म्मापेतो दुराचरः ।
वृषली रमते यस्तु पिशुनो नर्त्तनस्तथा ॥
ग्रामप्रेष्यो विकर्म्मा च यो द्विजश्चरिताव्रतः ।
वेदानपि जपन् शूद्रैः समः स परिकीर्त्तितः ।
सर्व्वेषु वर्ण्णनीयोऽसौ वैदिके तान्त्रिकेऽपि च ॥
निर्म्मर्यादे चाशुचौ क्रूरवृत्तौ
हिंसात्मके त्यक्तधर्म्मे प्रवृत्तौ ।
हव्यञ्च कव्यञ्च न देयमेव
दानञ्च दत्तं विफलं नरेन्द्र ! ॥
राजन्यानां करादानं विना वैवाहिकञ्च यः ।
प्रतिग्रहः स निन्द्योऽत्र परत्र चासुखप्रदः ॥
युद्धे पलायनञ्चैव तथा कातरताखिलं ।
अपालनं प्रजानाञ्च दाने धर्म्मे विरक्तता ॥
अनवेक्षा स्वराष्ट्रस्य ब्राह्मणानामनादरः ।
अमात्यानामसम्मानं तेषां कर्म्मानवेक्षणम् ॥
स्त्रीणाञ्च परीहासो निषिद्धः चत्रजन्मनाम् ॥
वैश्यानां धनलोभेन मिथ्यामत्यप्रकाशनम् ।
अपालनं पशूनाञ्च अनिज्या विभवे सति ॥
शूद्राणाञ्च महाराज ! इष्टेव धनसञ्चयः ।
शुश्रूषोः कृतकार्य्यस्य कृतसम्मानकर्म्मणः ॥
आभ्युदयातराज्यस्य शूद्रस्य जगतीपते ! ।
अस्याप्यन्तरगतस्यापि दृष्टधर्म्मगतस्य च ॥
आश्रमा विहिताः सर्व्वे वर्ज्जयित्वा निराशिषम् ॥"
इति पाद्मे स्वर्गखण्डे २७ अध्यायः ॥

अपि च ।
"यस्तु भागवतान् दृष्ट्वा भूत्वा भागवतः शुचिः ।
अभ्युत्थानं न कुर्व्वीत अहं वैष्णवापि हिंसितः ॥
यश्च कन्यां पिता दत्त्वा न प्रयच्छति तां पुनः ।
अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः ॥
भार्य्यां प्रियसखीं ये तु साध्वीं हिंसन्ति निर्घृणाः ।
न ते मूर्त्ता प्राप्नुवन्ति हिंसका दुष्टयोनिजाः ॥
ब्रह्मघ्नश्च कृतघ्नश्च गोघ्नश्च कृतपापकाः ।
एतान् शिष्यान् विवर्ज्जेत उक्ता ये चाप्युपातकाः ॥
शूद्रपक्वं न भोक्तव्यं न च्छेत्तव्यं कदाचन ।
अश्वत्थो वटवृक्षश्च न च्छेत्तव्यौ कदाचन ॥
न च्छेत्तव्यो बिल्ववृक्ष उडुम्बरश्च कदाचन ।
कर्म्मण्याश्चैव ये वृक्षा न च्छेत्तव्याः कदाचन ॥
यदीच्छेत् परमां सिद्धिं मोक्षधर्म्मं सनातनम् ।
भक्ष्याभक्ष्यञ्च ते शिष्य वेदितव्यं तदन्तरे ॥
करीरस्य वधः प्रस्तः पलाण्डोडुम्बरस्य च ।
सद्योभक्षी भवेत्तेन अभक्ष्याः पूतिवासिकाः ॥
न भक्षणीयं वाराहं मांसं मत्स्यस्य सर्व्वशः ।
अभक्ष्या ब्राह्मणैर्ज्ञेते दीक्षितैर्हि न संशयः ॥
परिवादं न कुर्व्वीत न हिंसां वा कदाचन ।
पैशुन्यञ्च न कर्त्तव्यं स्तेयं वापि कदाचन ॥
अतिथिञ्चागतं दृष्ट्वा दूराच्चागतमं क्वचित् ।
संविभागस्तु कर्त्तव्यो येन केनापि पुत्रक ! ॥
गुरुपत्नी राजपत्नी ब्राह्मणी वा कदाचन ।
मनसापि न गन्तव्या एवं विष्णुः प्रभाषते ॥
कनकादीनि रत्नानि यौवनस्था च कामिनी ।
तत्र चित्तं न कर्त्तव्यमेवं विष्णुः प्रभाषते ॥
दृष्ट्वा परस्य भार्य्याणि आत्मनो वसनन्तथा ।
तत्र मन्युर्न कर्त्तव्य एवं धर्म्मः सनातनः ॥"
इति वराहपुराणम् ॥
( निवारितम् । यथा, देवीभागवते । ३ । ६ । ६० ।
"मां मा मा मेति बहुधा निषिद्धोऽपि तथाप्यसौ ।
आलिलिङ्ग प्रियां दैवात् पपात धरणीतले ॥")
निषेकः, पुं, ( निषिच्यते प्रक्षिप्यत इति । नि+सिच्+घञ् । ) गर्भाधानम् । इति निषेकादिकृतशब्दटीकायां भरतः ॥ * ॥
"निषेकाद्यभते पत्नी गुरुर्भर्त्ता शुभाशुभम् ।
मन्त्रशिष्यसपत्नञ्च सर्व्वमेतन्न यत्नतः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३१ अध्यायः ॥
( यथा, मनुः । २ । १६ ।
"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित् ॥"
क्षरणम् ।) रेतः । यथा, मनुः । ४ । १५१ ।
"दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टान्नं निषेकञ्च दूरादेव समाचरेत् ॥"
"निषिच्यत इति निषेकं रेतस्त्योत्सृजेत् ।"
इति तट्टीकायां कुल्लूकभट्टः ॥ ( क्षरणम् । यथा, रघुः । ८ । ३८ ।
"ननु तैलनिषेकविन्दुना
सह दीपार्चिरुपैति मेदिनीम् ॥")

निषेकादिकृत्, पुं, ( निषेकादिं गर्भाधानादिकं करोतीति । निषेकादि+कृ+क्विप् । ) गर्भाधानादिकर्त्ता । आदिना सीमन्तोन्नयनादिमन्त्रविद्यादानादेश्च ग्रहणं तत्कर्त्ता पित्रादिर्गुरुः स्यात् । इत्यमरभरतौ ॥
निषेधः, पुं, ( नि+सिध्+घञ् । ) प्रतिषेधः । निवृत्तिः । विधिविपरीतः । यथा,—
"तिथीनां पूज्यता नाम कर्म्मानुष्ठानतो मता ।
निषेधस्तु निवृत्तात्मा कालमात्रमपेक्षते ॥"
इति तिथितत्त्वम् ॥
निषेवणं, क्ली, ( नि+सेव+भावे ल्युट् । ) सेवा । यथा, भागवते । १ । २ । १६ ।
"शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥"
निषेव्यः, त्रि, ( नि+सेव+भावे ण्यत् । ) सेवनीयः । यथा, भागवते । १ । १२ । २२ ।
"नगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव ॥"
निष्क, क ङ माने । इति कविकल्पद्रुमः ॥ ( चुरां-आत्मं-सकं-सेट् । ) महेन्त्यवर्ग्गमध्यः । क ङ, निष्कयते स्वर्णं वणिक् । इति दुर्गादासः ॥
निष्कः, पुं क्ली, ( निश्चयेन कायति शोभते इति । निस्+कै+आतश्चेति कः । ) चत्वारः सुवर्णाः । चारि मोहर इति भाषा ॥ यथा, मनुः । ८ । १३७ ।
"धरणानि दश ज्ञेयः शतमानस्तु राजतः ।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥"
साष्टशतसुवर्णः । हेम । उरोभूषणम् । ( यथा, रामायणे । १ । ६ । ११ ।
"नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ॥")
पलम् । दीनारः । इत्यमरः । ३ । ३ । १४ ॥ अस्य टीका यथा । "शास्त्रीयमेतदष्टमाषकपरिमितं स्वर्णं सुवर्णं तेषां सुवर्णानां अष्टाधिकशतम् । हेम स्वर्णमात्रम् । उरोभूषणं वक्षोऽलङ्कारः । पलं शास्त्रीयमानविशेषः । उरोभूषणं पलञ्च हेम एवेति केचित् । दीनारः सम्यग्व्यवहारार्थं माणवस्तु एव निष्कः । केचित्तु दीनार इति पल इत्यस्य विशेषणम् । दीनारे पले लौकिकपले न तु शास्त्रीये इत्याहुः ॥ स्मार्त्तास्तु द्वात्रिंशद्रक्तिकापरिमितं काञ्चनं दीनारः । तथाहि ।
'दीनारो रोपकैरष्टाविंशत्या परिकीर्त्तितः ।
सुवर्णचत्वारिंशतिमो भागो रोपक उच्यते ॥'
इति विष्णुगुप्तः ॥
सुवर्णोऽशीतिरक्तिकापरिमितं काञ्चनं तस्य सप्ततितमो भागः सप्तमांशाधिकद्वेरक्तिकायां रोपकः तदष्टाविंशत्या द्वात्रिंशद्रक्तिकापरिमितं हेम दीनार इति पर्य्यवसन्नेत्याहुः ।" इति भरतः ॥ * ॥ स्वर्णकर्षः । स्वर्णपलम् । इति हेमचन्द्रः ॥ कण्ठभूषा । इति जटाधरः ॥ माषकचतुष्टयम् । इति वैद्यकपरिभाषा ॥ (यथा,
"स्याच्चतुर्म्माषकैः शाणः स निष्कष्टङ्क एव च ॥"
इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)